## (664) "णम प्रह्वत्वे, शब्दे च"

(I-भ्वादिः-981. सक. अनि. पर. घटादिः । )

'—शब्दे च' इत्यर्थः क्षीरस्वामिना न पठ्यते ।

नामकः-मिका, [1]नमकः-नामकः-[2]प्रणमकः-मिका, [3]निनंसकः-सिका, [4]नंनमकः-नन्नमकः-मिका ;

[5]नन्ता-त्री, नमयिता-नामयिता-प्रणमयिता-त्री, निनंसिता-त्री, नंनमिता-नन्नमिता-त्री ;

नमन्-न्ती, नमयन्-नामयन्-प्रणमयन्-न्ती, [6]उन्नामयन्, निनंसन्-न्ती ; — नंस्यन्-न्ती-ती, नमयिष्यन्-नामयिष्यन्-प्रणमयिष्यन्-न्ती-ती, निनंसिष्यन्-न्ती-ती ; —

— नमयमानः-नामयमानः-प्रणमयमानः, — नंनम्यमानः ; — नमयिष्यमाणः-नामयिष्यमाणः-प्रणमयिष्यमाणः, — नंनमिष्यमाणः ;

---

1. 'ज्वलह्वलह्मलनमामनुपसर्गाद्वा' (ग. सू. घटादौ) इति, उपसर्गसमभिव्याहाराभावे मित्संज्ञा विकल्प्यते । मित्त्वपक्षे उपधाह्रस्वः । एवं ण्यन्ते सर्वत्रोपसर्गसमभिव्याहाराभावे रूपद्वयं बोध्यम् ।

2. उपसर्गसमभिव्याहारे तु 'जनीजॄष्क्नसुरञ्जोऽमन्ताश्च' (ग. सू. घटादौ) इत्यनेनामन्तत्वात् नित्यं मित्त्वम् । तेन णौ उपधाह्रस्वः । 'उपसर्गादसमासेऽपि णोपदेशस्य' (8-4-14) इति णत्वम् । एवम् उपसर्गसमभिव्याहारे सर्वत्र ज्ञेयम् ।

3. सन्नन्तात् ण्वुलि, 'नश्चापदान्तस्य झलि' (8-3-24) इति अनुस्वारः । एवं सन्नन्ते सर्वत्र ज्ञेयम् ।

4. 'नुगतोऽनुनासिकान्तस्य' (7-4-85) इति नुगागमः । 'नुकाऽनुस्वारो लक्ष्यते' इति भाष्ये उक्तम् । 'स च पदान्तवद्वाच्यः' (वा. 7-4-85) इति वचनात् पक्षे 'वा पदान्तस्य' (8-4-59) इति परसवर्णविकल्पः । एवं यङन्ते सर्वत्र रूपद्वयं बोध्यम् ।

5. अस्य धातोरनुदात्तत्वात् 'एकाच उपदेशेऽनुदात्तात्' (7-2-10) इतीण्णिषेधः । वलाद्यार्धधातुके सर्वत्र एवं बोध्यम् ।

6. उपसर्गसमभिव्याहारे नित्यं मित्त्वात्, उन्नामयन् इत्यस्य साधुत्वाय घञन्तादुन्नामशब्दात् 'तत्करोति तदाचष्टे' (वा. 3-1-26) इति णिजन्तात् शता कल्पनीयः इति सिद्धान्तकौमुदी ।